## अध्याय :- १० Chapter-10

[1]नारद उवाच ।।
गृध्रस्यैतद्वचः श्रुत्वा दुःख विस्मय संयुतः ।।
इन्द्रद्युम्नस्तमा पृच्छ्य मरणायोपचक्रमे ।। १

ततस्तमालोक्य तथा मुमूर्षु[2] कौशिकादिभिः[3] ।।
[4]स संहितं विचिंत्याह दीर्घायुषामथात्मन : ।। २

मैवं कार्षीः श्रुणु गिरं भद्रकत्वं चिरंतनः ।।
मत्तोऽप्यस्ति स्फुटं चैव ज्ञास्यति त्वदभीप्सितम् ।। ३

मानसे सरसि ख्यातः कूर्मो मंथरकाख्यया ।।
तस्य नाविदितं किंचिदेहि तत्र व्रजामहे ।। ४

ततः प्रतीतास्ते भूपमुनिगृध्र बकास्तथा ।।
उलूक सहिताजग्मुः सर्वेकूर्म दिदृक्षवः ।। ५

सरस्वती तीरे स्थितः कूर्मस्तान्निरीक्ष्य विदूरगान् ।।
कांदिशीको विवेशासौ जलं शीघ्रतरं तदा ।। ६

कौशिकोऽथ तमाहेद्रं प्रहस्य वचनं स्वयम् ।।
कस्मात्कूर्म प्रनष्टोद्य विमुखोऽभ्यागतेष्वपि ।। ७

---

१ ब श्री नारद उ० ।।
२ अ तमूष्णुः ब मूमूर्षु
३ ब कशका....
४ अ सहितं सं

अग्निर्द्विजानां विप्रश्च वर्णानां रमणः स्त्रियाम् ।।
गुरुः पिता च पुत्राणां सर्वस्याभ्यातो गुरुः ।। ८

विहाय तमिमं धर्ममातिथ्यं विमुखः कथम् ।।
गृहणासि[1] पापं[2] सर्वेषां ब्रूहि कूर्मो[3] धुनोत्तरम् ।। ९

कूर्म उवाच ।।
चिरंतनो हि जानामिकर्तुमातिथ्यं सत्क्रियाम् ।।
अभ्यागतेष्व पचितिं धर्मशास्त्रेषु निश्चितम् ।। १०

सुमहत्कारणं चात्र श्रूयतां तद्वदामि वः ।।
नाहं पराङ्मुखो जात एतावंति दिनान्यपि ।। ११

अभ्यागतस्य कस्यापि सर्वसत्कार सद्वति ।।
किं त्वेष पंचमो यो वो दृश्यते सरलाकृतिः ।। १२

इंद्रद्युम्नो महीपालो बिभेम्यस्मादलंतराम् ।।
अमुना यजमानेन रौचकाख्ये पुरा पुरे ।। १३

यज्ञपावकदग्धा मे पृष्ठिर्नाद्यापि निर्व्रणा ।।
तन्मे भयं पुनर्जातं किमयं पुनरेव माम् ।। १४

---

१ ब गृहणामि
२ ब पापां
३ अ कर्मा ब कूर्मो

पपात पुष्पवृष्टिश्च खाद्विमुक्ताप्सरां गणैः ।।
सस्वनुर्देववाद्यानि कीर्त्युद्धारे महीपतेः ।। १५

आसुतीवलमाधाय[1] भुवि धक्ष्यति[2] संप्रति ।।
इति वाक्यावसाने तु कूर्मस्य कुरुसत्तम् ।। १६

विस्मितास्ते च ददृशुर्विमानं पुरतः स्थितम् ।।
इंद्रद्युम्नकृते देवदूतेनाधिष्ठितं तदा ।। १७

अयातयामाः[3] प्रददुराशिषोऽस्मै सुरद्विजाः ।।
साधुवादो दिवि महानासीत्तस्य महीपतेः ।। १८

ततो विमानमालंब्य देवदूतस्तमुच्चकैः ।।
इंद्रद्युम्नमुवाचेदं शृण्वतां नाकवासिनाम् ।। १९

देवदूत उवाच ।।
नवीकृताधुना कीर्तिस्तव भूपाल निर्मला ।।
त्रिलोक्यामपि तच्छीघ्रं विमानमिदमारुह ।। २०

गम्यतां ब्रह्मणो लोकमाकल्पं तपसोर्जितम् ।।
प्रेषितो[4]ऽहमने[5] नैव तवानयनकारणात् ।। २१

---

१ बृ. असुती बलमाधाय
२ बृ. वक्ष्यसि
३ अ. आयातयामाः
४ अ। क्र. प्रेषितौ
५ अ. हंते

यावत्कीर्तिर्मनुष्यस्य पृथिव्यां प्रथिता भवेत् ।।
तावानित भवेत्स्वर्गी सति पुण्ये ह्यनंतके ।। २२

सुरालयसरो वापीकूपारामादिकल्पना ।।
एतदर्थं हि पूर्ताख्या धर्मशास्त्रेषु निश्चिता[1] ।। २३

इंद्रद्युम्न उवाच ।।
अमी ममैव सुत्ददो मार्कंड बककौशिकाः ।।
गृध कूर्मो[2] प्रभावोऽयममीषां मम वृद्धये ।। २४

तच्चेदमी मया साकं ब्रह्मलोकं प्रयान्त्युत ।।
पुरः स्थितास्तदायास्ये ब्रह्मलोकं च नान्यथाः ।। २५

परेषामनपेक्ष्यैव कृतप्रतिकृतं हि यः ।।
प्रवर्तते हितायैव स सुत्दत्प्रोच्यते बुधैः ।। २६

स्वार्थोद्युक्तधियो ये स्युरन्वर्थान्तेप्यसुंधराः ।।
मरणं प्रकृतिश्चैव जीवितं विकृतिर्यदा ।। २७

प्राणिनां परमोलाभः केवलं प्राणिसौत्ददम् ।।
दरिद्रा रागिणोऽसत्य प्रतिज्ञाता गुरुद्रुहः ।। २८

---

१ अ ताः
२ अ. ब "कूर्मगृधो"

[नि]
मित्रावसाविनः पापाः प्रायो नरकमंडनाः ।।
[1]परार्थनिष्टास्तदमी पंच संप्रति साधवः ।। २९

मम कीर्तिसमृद्धारः स प्रभावो महात्मनाम् ।।
तदाहमपि यास्यामि देवदूतान्यथा नहि ।। ३०

देवदूत उवाच ।।
एते हरगणाः सर्वेशापऽभ्रष्टाःक्षितिंगताः ।। ३१

शापांते हरपार्श्वे तु यास्यंति[2] पृथिवीपते ।।
विहाये मानतो[3] भूप त्वामागच्छ मया सह ।। ३२

न चैषां रोचते स्वर्गोहित्वा देवं महेश्वरम् ।।
इंद्रद्युम्न उवाच ।।
यद्येवं गच्छ तद्दूत नायास्येहं त्रिविष्टपम् ।। ३३

तथा तथा यतिष्यामि भविष्यामि यथा गणः ।।
अविशुद्धिक्षयाऽधि क्यदूषणैरेष निंदितः ।। ३४

स्वर्गः सदानुश्रविकस्तस्मादेनं न कामये ।।
तत्रस्थस्य पुनः पातो[4] भयं न व्येति मानसात् ।। ३५

---

१ ब. परार्थनिष्टा

२ अ. गंतव्यं

३ ब. मानता

४ अ. पात

पुनः पातो यतः पुंसस्तस्मात्स्वर्गं न कामये ।।
सति पुण्ये स्वयं तेन पातितो निबलोकतः ।। ३६

चतुर्मुखिन वैलक्ष्यं गतो ऽस्मि कथमेम्म तम् ।
इतीदुमुक्तवा दूतं ते[1] श्रृण्वतो ऽस्यैव विस्मयात् ।। ३७

अप्राक्षीद्भूपतिः कूर्मं तदायुः कारणं तदा ।।
इदमायुः कथं जातं कूर्म आतं कूर्म दीर्घतमं तव ।। ३८

सुत्दृन्मित्रं गुरुस्तवं मे येनकीर्तिर्ममोद्धृता ।। ३९

कूर्म उवाच ।।
श्रृणु भूप[2] कथां दिव्यां[3] श्रवणात्पापनाशिनीम् ।।
कथां सुमधुरामेतां शिवमाहात्म्य संयुताम् ।। ४०

श्रृण्वन्निमामपि कथां नृपते मनुष्यः सुश्रद्धया
भवति पाप विमुक्त देहः ।।
श्रीभोप्रसादमभिगम्य[4] यथायुरेवमासीत्प्रसादत
इयं मम कूर्मता च ।। ४१
५ इति श्री स्कंदे ---------- महीप्रादुर्भावे दशमो ऽध्यायः ।।

---

१ अ. तुं
२ ब. भूत
३ अ. पुण्यां ४ ब धिगम्य
५ अ. इति श्री स्कंदपुराणे कुमारिकाखंडे महीप्रादुर्भावे इंद्रद्युम्न कीर्ति समुद्धारः ।।
ब. इतिश्री स्कंदपुराणे कुमारिकाखंडे महीप्रादभवे दशमोध्यायः ।।